शक्तिजन्यज्ञाने पदस्मृतिं विनापि लक्षणाजन्या पदस्मृतिः शाब्दबोधात्। न चानेन हितोलत्वसम्बन्धेन शक्तिज्ञानजन्यो पदस्मृति विशिष्टशाब्दबुद्धित्वम् कार्यतावच्छेदकम् शक्ति~~ज्ञान~~जन्यो पदस्मृतित्वं लक्षणाज्ञानजन्यो पदस्मृतित्वं च कारणतावच्छेदकमिति वाच्यम्। अनन्तकार्यकारणभावप्रसङ्गात्। नित्यानन्दपर्वतीयपक्षे प्रवाहादि सम्बन्धितत्त्वेनोपस्थितिरित्यादौ गङ्गापदः 'सर्वे सर्वार्थवाचकाः' इति भाष्यात् सामान्यतः पूर्वमेव ज्ञातः शक्तिरूपः सम्बन्ध एव कल्पनीयो न तु शक्य सम्बन्धरूपः। तथा सति तयोरुभयोः शाब्दबोधजनकपदार्थोपस्थितिजनक पदार्थसम्बन्धत्वरूपं शाब्दबोधजनकपदार्थसम्बन्धत्वरूपं शाब्दबोध-जनकपदार्थसम्बन्धत्वरूपं वा वृत्तित्वं कल्पनीयम्। शाब्दबोधकारणता वच्छेदकम् उपस्थितकारणतावच्छेदकत्वं च शक्तत्वशक्यसम्बन्धयो रुभयोः कल्पनीयमिति गौरवम्। शक्तिकल्पनापक्षे तु तस्या एव वृत्तित्व कल्पनम्, तस्यैव च तत्तदवच्छेदकत्वकल्पनमिति लाघवम्। तन्मते अन्यदपि गौरवं भूषणादौ स्पष्टं प्रतिपादितम्। तद् एवावगन्तव्यम्। व्यवहारादिना गङ्गापदादौ तीरादिशक्तेः पूर्वं विशेषरूपेण ग्रहणाभावेन निर्वाहसंभवे लक्षणावृत्तिप्रयुक्तकार्यकारणादिकल्पनायाम् अतिरिक्त गौरवस्य दुरुद्धरत्वादिति भावः। गौरवाच्च पूर्वमेव निरूपितम्। अधिकं वैयाकरणभूषणादौ विवेचितं तत् एवावधेयम्।

तथाहि शक्तिर्द्विविधा प्रसिद्धाऽप्रसिद्धा च। आमजन्यबुद्धिवेद्यत्वं प्रसिद्धत्वम्। सहृदयहृदयमात्रवेद्यत्वं प्रसिद्धत्वम्। सहृदयहृदयमात्रवेद्यत्वमप्रसिद्धत्वम्। तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः, तीरादौ चाप्रसिद्धेति किमनुपपन्नम्? ननु सर्वे सर्वार्थवाचका इति चेत् ब्रूमो तर्हि घटपदात् पटप्रत्ययः स्यादिति चेन्न। सति तात्पर्ये इत्यस्य तात्पर्याभावादिति ग्रहणात्। तात्पर्यं चात्र एवं देवतामहर्षिलोकवृद्धपरम्परातोऽस्मदादि निर्णयमिति सर्वं सुस्थम्।

अमरनाथमिश्र
एसो॰ प्रो॰ व्याकरण
रा॰ उ॰ सं॰ म॰वि॰
सुलतानपुर

दिनांक ४/११/२० शास्त्री तृतीय 2405 - विषय - व्याकरण
ग्रन्थ - परमलघुमञ्जूषा

प्रश्न – तार्किकमते लक्षणं स्वरूपं प्रतिपाद्य लक्षणावृत्तिखण्डन पूर्वकं शाब्दिकमतं लेख्यम्।

उत्तर – असति प्रयोजने शक्यसम्बन्धो निरूढा लक्षणा। यथा शातमित्यादौ यथा त्वचकर्मणि कुशले। इयं च शक्यपर्यायेति बोध्यम्। गङ्गायां घोष इत्यत्र तीरे गङ्गागतशैत्यपावनत्वादि प्रतीतिः प्रयोजनम्। कुन्ताः प्रविशन्ति इत्यत्र वाच्ये कुन्तविशिष्टपुरुषे कुन्तगततैक्ष्ण्यप्रतीतिः प्रयोजनम्। एवं च गौर्वाहीक इत्यत्र सादृश्यं लक्ष्यतावच्छेदकं गवाभेदस्य।
अर्थात् — कविसंप्रदायानुसारेणेत्यर्थः। प्रयोजनाभावे शक्यार्थबाधे प्रतिसन्धानपूर्वकं शक्यार्थे लक्षणा। यत्तु तत्तु इयं शक्तिरेव बोध्या। गौर्वाहीक प्रत्ययपर्यन्तं फलम् बाध्यम्। कुन्तविशिष्टपुरुषे कुन्तानामिव तीक्ष्णता प्रतीति प्रयोजनम्। एषु प्रयोजनवती लक्षणा।
तात्पर्यसत्तात्पर्ये सर्वे सर्वार्थवाचका इति भाष्य लक्षणम्। ~~अन्यायत्वात्~~ भावात्। वृत्ति रूपवच्छेदक रूप कल्पने गौरवात्। नवीनवृत्ति ~~[illegible]~~ कल्पनाया अन्याय्यत्वाच्च। कथं तर्हि गङ्गादिपदात्तीरप्रत्ययः? अत्रोच्यते सति तात्पर्ये सर्वे सर्वार्थवाचका इति भाष्ये प्रदिष्टम्।

अर्थभाव – अत्र तार्किकाः सर्वे शब्दाः सर्वार्थवाचकाः सर्वमर्थं अभिदधति इति भाष्यकथनेन लक्षणा नास्त्येव। भाष्यानुसारं गङ्गापदं यथा जलप्रवाहविशेषं शक्नोति तथैव तीरेऽपि, एवं चानेकार्थ वृत्तिः स्वीकारप्रयुक्तं न गौरवम्। न चैवं स्वीकारे गङ्गापदेन घटादेरप्युपस्थितिः। तत्र तत्र शक्तिनियामकत्वं यथा तात्पर्याभावेन च न तद्बोधापत्तिः वक्तुं शक्यत्वात्। अर्थात् लक्षणा स्वीकारे शाब्दबोधं प्रति शक्तिजन्या पदोपस्थितिः लक्षणाजन्योपस्थितिश्च कारणत्वं वाच्यम् इति कार्यकारणभावद्वय कल्पने गौरवम्। शक्तिमात्राङ्गीकारे वैयाकरणमते शक्तिजन्योपस्थितिः नैव हेतुरिति लाघवम्। किञ्च लक्षणावृत्ति स्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः। शक्तिजन्योपस्थितिं विनापि लक्षणाजन्योपस्थितेः शाब्दबोधात्। न चाव्यवहितोत्तरत्वसम्बन्धेन

दिनांक 5-11-20

उपशास्त्री प्रथमवर्ष - विषय - व्याकरण
ग्रन्थ - सिद्धान्तकौमुदी (हलन्तपुंल्लिङ्गप्रकरणम्)

1 राजा — राजन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिकसंज्ञायाम्, स्वौजसमौट् इति सूत्रेण द्व्येकयोर्द्विवचनैकवचने इति सूत्रसहयोगेन सुविभक्तौ अनुबन्धलोपे। हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् इति सुलोपे। नलोपः प्रातिपदिकान्तस्य इति नलोपे। तथा सर्वनामस्थाने चासम्बुद्धौ इति सूत्रेण उपधादीर्घे राजा इति सिद्धम्।

2 राज्ञः — राजन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिकसंज्ञायाम्, स्वौजसमौट् इति सूत्रेण तथा बहुषु बहुवचनम् इति सूत्रसहयोगेन शस् विभक्तौ अनुबन्धलोपे। अल्लोपोऽनः इति सूत्रेण जकारोत्तरवर्ति अकारस्य लोपे। स्तोः श्चुना श्चुः इति श्चुत्वे जकारः ञकार जकार ञकार संयोगे सति सकारस्य स्थाने रुत्वे विसर्गे राज्ञः इति सिद्धम्।

3 यज्वनः — यज्वन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिकसंज्ञायाम् स्वौजसमौट् इति सूत्रेण तथा बहुषु बहुवचनम् इति सूत्रसहयोगेन शस् विभक्तौ, अनुबन्धलोपे। यज्वन् अस् इति जाते। अल्लोपोऽनः इति सूत्रेण अकारलोपे प्राप्ते, न संयोगाद्वमन्तात् इति सूत्रेण अकारलोपनिषेधे सकारस्य रुत्वे विसर्गे यज्वनः इति सिद्धम्।

4 वृत्रहा — वृत्रहन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिकसंज्ञायां स्वौजसमौट् इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्रसहयोगेन सुविभक्तौ, अनुबन्धलोपे। सर्वनामस्थाने चासम्बुद्धौ इति सूत्रेण उपधादीर्घे प्राप्ते, इन्हन्पूषार्यम्णां शौ इति सूत्रेण दीर्घनिषेधे, पुनः सौ च इति सूत्रेण दीर्घे कृते हल्ङ्याब्भ्यो इति सूत्रेण सुलोपे तथा नलोपः प्रातिपदिकान्तस्य इति सूत्रेण नलोपे सति वृत्रहा इति सिद्धम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
सुलसैना पूर्णिमा

दिनांक 5-11-20 उपशास्त्री द्वितीयवर्ष, विषय- व्याकरण
ग्रन्थ- सिद्धान्तकौमुदी

1 अचैसीत् - चिञ् धातोर्लुङ्, लुङ्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे। हलन्त्यम् इति सूत्रेण इकार लोपे। लुङ्लङ्लृङ्क्ष्वडुदात्तः इति सूत्रेण अडागमे अनुबन्धलोपे। च्लि लुङि इति सूत्रेण च्लि प्रत्यये च्लेः सिच् इति सूत्रेण च्लेःस्थाने सिजादेशे अनुबन्धलोपे। अचि स त् इति जाते। अपृक्तत्वात् ईडागमे सिचि वृद्धिः परस्मैपदेषु इति सूत्रेण वृद्धौ। आदेशप्रत्यययोः इति सूत्रेण षत्वे अचैसीत् इति सिद्धम्।

2- स्तृणोति - स्तृञ् धातोर्लट्, लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे। तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुक संज्ञायाम्, शपं प्रबाध्य स्वादिभ्यः श्नुः इति सूत्रेण श्नुप्रत्यये अनुबन्धलोपे, सार्वधातुकत्वात् उकारस्य स्थाने गुणे। ऋवर्णान्नस्य णत्वं वाच्यम् इ सूत्रेण णत्वे कृते स्तृणोति इति सिद्धम्।

3 - तस्तार - स्तृञ् धातोर्लिट्, लिट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये, परस्मैपदानां णलतुसुस्थलथुस इति सूत्रेण णलादेशे अनुबन्धलोपे। लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे, पूर्वोऽभ्यासः इति सूत्रेण अभ्यास संज्ञायाम् उरत् इति अत्वे रपरत्वे स्तर् स्तृ अ इति जाते। शर्पूर्वाः खयः इति सूत्रे खय् शेषे (त) अन्ये हलो लुप्यते (लोपे) ऋतश्च संयोगादेर्गुणः ~~इति सूत्रेण गुणो~~ इति गुणे रपरे। अत उपधायाः इति वृद्धौ तस्तार इति सिद्धम्।

4 धुनोति - धुञ् धातोर्लट्, लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे। सार्वधातुक संज्ञायाम्, शपं प्रबाध्य स्वादिभ्यः श्नुः इति सूत्रेण श्नुप्रत्यये अनुबन्धलोपे। सार्वधातुकत्वात् गुणे धुनोति इति सिद्धम्।

अध्यापिका
एसो०प्रो० व्याकरण
रा०उ०सं०म०वि०
सुरवसेना पूर्णिमा